दौषधिर्नकुलदंष्ट्राग्रस्पृष्टा सा सर्व्वाऽपि सर्पविषं हन्तीत्येतादृशी संज्ञा अस्मदादिविशिष्टानां लिङ्गमनुमापकं याऽपि मैत्रादिसंज्ञा पित्रा पुत्रे क्रियते साऽपि "द्वादशेऽहनि पिता नाम कुर्य्यात्" इत्यादि विधिना नूनमीश्वरप्रयुक्तैव तथाच सिद्धं संज्ञाया ईश्वरलिङ्गत्वम् । एवं कर्म्मापि कार्य्यमपीश्वरे लिङ्गं तथाहि क्षित्यादिकं सकर्तृकं कार्य्यत्वात् घटवदिति अत्र यद्यपि शरीराजन्यं जन्यं वा जन्यप्रयत्नाजन्यं जन्यं वा सकर्तृकत्वासकर्तृकत्वेन विवादाध्यासितं वा सन्दिह्यमानकर्तृकत्वं वा क्षित्यादित्वेन न विवक्षितम् अदृष्टद्वारा क्षित्यादेरपि जन्यप्रयत्नजन्यत्वात् विवादसन्देहयोश्चातिप्रसक्तत्वेन पक्षतानवच्छेदकत्वात् किञ्च सकर्तृकत्वमपि यदि कृतिमज्जन्यत्वं तदाऽस्मदादिना सिद्धसाधनम् अस्मदादिकृतेरप्यदृष्टद्वारा क्षित्यादिजनकत्वात् उपादानगोचरकृतिमज्जन्यत्वेऽपि तथा,-अस्मदादिकृतेरपि किञ्चिदुपादानगोचरत्वात्, कार्य्यत्वमपि यदि प्रागभावप्रतियोगित्वं तदा ध्वंसे व्यभिचार इति तथापि क्षितिः सकर्तृका कार्य्यत्वात् अत्र च सकर्तृकत्वमदृष्टाद्वारककृतिमज्जन्यत्वं कार्य्यत्वञ्च प्रागभावावच्छिन्नसत्ताप्रतियोगित्वं नचाङ्कुरादौ सन्दिग्धानैकान्तिकत्वं साध्याभावनिश्चये हेतुसत्त्वसन्देहे सन्दिग्धानैकान्तिकत्वस्य दोषत्वात् अन्यथा सकलानुमानोच्छेदप्रसङ्गः, न च पक्षातिरिक्ते दोषोऽयमिति वाच्यं राजाज्ञापत्तेः नहि दोषस्यायं महिमा यत् पक्षं नाक्रामति तस्मादङ्कुरस्फुरणदशायां निश्चितव्याप्तिकेन हेतुना तत्र साध्यसिद्धेरप्रत्यूहत्वात् न सन्दिग्धानैकान्तिकता तदस्फुरणदशायान्तु सुतरामिति संक्षेपः" ।

एवं न्यायकणादसूत्रभाष्यादिषु प्रदर्शितेश्वरानुमानप्रकारमधिकृत्य कुसुमाञ्जलिहरिदासटीकयोः दिङ्मात्रेण किञ्चित् विस्पष्टमुक्तं यथा

"तत्साधकप्रमाणाभावात् इति पञ्चमविप्रतिपत्तिः नन्वीश्वरे साधकप्रमाणमेव नास्त्यत आह" हरि० । "कार्य्यायोजनधृत्यादेः पदात् प्रत्ययतः श्रुतेः। वाक्यात् सङ्ख्याविशेषाच्च साध्यो विश्वविदव्ययः" का० "क्षित्यादि सकर्तृकं कार्य्यत्वात् घटवत् सकर्तृकत्वञ्च उपादानगोचरापरोक्षज्ञानचिकीर्षाकृतिमज्जन्यत्वम् । आयोजनं कर्म एवञ्च सर्गाद्यकालीनद्व्यणुकारम्भकपरमाणुद्वयसंयोगजनकं कर्म्म चेतनप्रयत्नपूर्व्वकं कर्म्मत्वात् अस्मदादिशरीरक्रियावत् । धृतीति ब्रह्माण्डादि पतनप्रतिबन्धकीभूतप्रयत्नवदधिष्ठितं धृतिमत्त्वात् वियति विहङ्गमधृतकाष्ठवत् धृतिश्च गुरुत्ववतां पतनाभावः। धृत्यादेरित्यादिपदात् नाशपरिग्रहः ब्रह्माण्डादि प्रयत्नवद्विनाश्यं विनाशित्वात् पाट्यमानपटवत् । पदात् पद्यतेऽनेनेति व्युत्पत्त्या पदं व्यवहारः पटादिसम्प्रदायव्यवहारः स्वतन्त्रपुरुषप्रयोज्यः व्यवहारत्वात् आधुनिकलिप्यादिव्यवहारवत् । प्रत्ययतः प्रामाण्यात् वेदजन्यज्ञानं कारणगुणजन्यं प्रमात्वात् प्रत्यक्षादिप्रमावत् । श्रुतेर्वेदात् वेदः पौरुषेयो वेदत्वात् आयुर्वेदवत् । किञ्च वेदः पौरुषेयो वाक्यत्वात् भारतवत् वेदवाक्यानि पौरुषेयाणि वाक्यत्वात् अस्मदादिवाक्यवत् । संख्याविशेषात् । द्व्यणुकपरिमाणं सङ्ख्याजन्यं परिमाणप्रचयाजन्यत्वे सति जन्यपरिमाणत्वात् तुल्यपरिमाणकपालद्वयारब्धघटपरिमाणात् प्रकृष्टतादृशकपालसदृशकपालद्वयारब्धघटपरिमाणवत् अणुपरिमाणञ्च न परिमाणजनकं नित्यपरिमाणत्वात् अणुपरिमाणत्वाद्वा एवञ्च सर्गादौ द्व्यणुकपरिमाणहेतुपरमाणुनिष्ठद्वित्वसंख्या च नास्मदाद्यपेक्षाबुद्धिजा अतस्तदानीन्तनापेक्षाबुद्धिरीश्वरस्यैवेति । विश्वविदव्यय इति विशिष्टस्याव्ययत्वं तेन नित्यसर्व्वविषयकज्ञानसिद्धिः ननु शरीरविशिष्टस्य कर्तृतया विशेषणबाधात्मको विशिष्टबाध इति कर्तृजन्यत्वव्यापकशरीरजन्यत्वाभावात् कर्तृजन्यत्वाभाव इति सत्प्रतिपक्षता च । यद्वा कर्त्ता शरीर्य्येव इति व्याप्तिविरोधिनी यद्वा व्याप्त्या यथादर्शनप्रवृत्तया शरीरी कर्त्ता च उपनेयः, पक्षधर्म्मतया च क्षित्यादावशरीरीति साध्याप्रसिद्धिः विशेषणविशेष्यविरोधश्च यद्वा शरीरजन्यत्वाद्युपाधिना व्याप्यत्वासिद्धिरिति कार्य्यत्वहेतौ पञ्च दोषास्तत्राह" हरि० । "न बाधोऽस्योपजीव्यत्वात् प्रतिबन्धो न दुर्बलैः। सिद्ध्यसिद्ध्योर्विरोधो न नासिद्धिरनिबन्धना" का० "ईश्वरे धर्म्मिणि शरीरबाधात् कर्तृत्वबाधेन, अधिकरणज्ञानं विना अभावज्ञानासम्भवात् अस्य कार्य्यत्वस्य धर्म्मिसाधकस्याधिकरणज्ञानजनकतया अवश्यमपेक्षणीयत्वेन बलवत्त्वात् । एवञ्च न विशेषणबाधात्मको विशिष्टबाधः प्रत्यक्षात्मकः । ईश्वरो न कर्त्ता अशरीरत्वात् इत्यनुमानबाधोऽपि नेत्यर्थः । क्षित्यादौ न सकर्तृकत्वं शरीराजन्यत्वात् इति न प्रतिबन्धकं सत्प्रतिपक्षहेतोः शरीरांशवैयर्थ्यात् व्याप्यत्वासिद्ध्या दुर्बलत्वात् । तृतीयेऽपि कार्य्यत्वव्याप्तेः पक्षधर्म्मत्वसहकारात् विपक्षबाधकतर्कावताराच्च बलवत्त्वम् । उपन्यस्तायाः कर्त्ता शरीर्य्येवेति व्याप्तेर्दुर्बलतया न प्रतिबन्धः । चतुर्थे च यदि पक्षधर्म्मतया अशरीरी उपस्थितस्तदा न विरोधः